श्रीगणेशायनमः॥ अथदीक्षांप्रवक्ष्यामिदेविसंक्षेपतःशृणु॥वेदाभ्यासेननिरतदेवीभक्तिसमन्वि
तं १ एवंप्रकारांतंशिष्यंप्रयत्नेगुरुपुंगवः॥कौलदीक्षांगुरुःसम्यक्चतुस्तंभैर्विराजिते २ मंडपेवेदिकाम
ध्येनूपुरद्वयवेष्टिते॥उपक्रम्यततःकुर्याद्वेदिकायांत्रिरेखया॥३॥व्रीह्यादिपंचधान्यंचप्रगृह्यकुलनायिके॥
चतुर्दलंततःकृत्वातन्मध्येबिंदुसंयुतं ४ तन्मध्येनिक्षिपेत्कुंभान्संस्थाप्यविधिवत्ततः॥तत्तत्क्रमेणमतिमान्पू
जयेत्कुलनायिके ५ आम्नायपंचकादेवीपंचकुंभेषुभावयेत्॥कुंभस्येशानभागेतुपंचगव्यंनिधापयेत् ६
ततश्चाग्नेयभागेतुमृत्तिकांकुलनायिके॥कुंभस्यपश्चिमेभागेस्थापयेच्चक्रनायकीं ७ ईशानपूर्वभागेतुकुं
डमाधाहनीयकं॥होमकुंडस्यमध्येतुदीर्घचक्रंविभावयेत्॥८॥चतुरश्रंचवृत्तंचषट्कोणंचाग्निबिंडकं॥ध्यात्वा
चमूलमंत्रेणदेवीभक्तिसमन्वितः॥९ दूर्वाचवटपत्रंचगुडूचीसोमवल्लिका॥औदुंबरंतथादेवीसमिदाज्याहुति स्नो
स्तथा १० ततश्चाकुरुमंत्रेणपायसान्नघृतंतथा॥अष्टाविंशतिराहुत्यादेवीश्रद्धापुरःसरं ११ ततःशिष्यंस
माहूयकलान्यासेनशोधयेत्॥प्राशयेत्पंचगव्यंचसद्योजातेतिमंत्रतः १२ पंचमृत्तिकयास्नानंभस्मोद्धूल
नपूर्वकं॥अलंकृत्यस्रवस्त्रेणअमृतत्वेनदैशिकः॥१३ दृष्टिबंधप्रकुर्वीतयथावत्कुलनायिके॥गुरोर्दक्षिणभा
गेतुशिष्यंस्वस्थसमाधिकृत् १४ पंचगव्यंततोदद्याद्विद्यातत्वेनदैशिकः॥प्राशयित्वाकृतंशिष्यंपश्चाद्दीक्षांप्रव

र्तयेत्॥२५॥दृष्टिबंधविसृज्यथप्रणमेद्गुरुपुंगवं॥ततोगुरुःप्रसन्नात्माअमृतादिकलान्यसेत्॥१६॥आत्मासने स्थितंशिष्यंशिवतत्वेनशोधयेत्॥तत्पश्चात्कुलदेवेशिक्रपयागुरुपुंगवः१७ द्वादशार्धांचमातंगीगुरुविघ्नेशमेव च॥पीठत्रयंततःपश्चादुपदिश्ययथाक्रमं १८ अभिषेकंततःकुर्यादेतैर्मंत्रैरनुक्रमात्॥अष्टांगयोगनिरतोगुरु रीक्षांप्रकल्पयेत् १९ श्रीदीक्षामंडपद्वारेआस्थितंस्वस्थमानसं॥आगच्छपुत्रपुत्रेतिआहूयागुरुपुंगवः २० रहस्यं शृणुपुत्रतंत्रकस्यापिप्रकाशयेत्॥कुलमार्गेप्रसर्वेषुकुलनिष्ठाप्रवर्तकः २१ ततश्चात्कुलयोगीशोशिष्यायगुरुमथा ब्रवीत्॥हेस्वामिन्सर्वधर्मज्ञतथामांतंविचारय॥२२॥विप्रकाशप्रमार्गंदेहिमेगुरुपुंगवः॥श्रुत्वाततोगुरुर्देवींसविमं त्रंप्रकाशयेत् २३ तत्पश्चाच्छुद्धविद्यांचदर्शयेत्कुलसुंदरी॥बालापद्धतिमभ्यर्च्यबालामंत्रंप्रकाशयेत् २४ पूर्वकुंभंसमु द्धृत्यअभिषेकंसमाचरेत्॥स्नानकालेस्मरेद्देवींशिष्योध्यायेद्गुरुंप्रभुं २५ ततःप्रसन्नशिष्योथशुभवस्त्रंप्रगृह्यच॥ ओर्ध्वपुंड्रंत्रिपुंड्रंवाधारयेत्कुलसुंदरी २६ ततःशिष्यस्यहृदयेगुरुर्ध्यात्वाप्रवेशयेत्॥गुरुप्रसन्नतंशिष्यंआहूया कुलनायिके ३७ सोमवल्लीशमीकृत्वाप्रदद्याद्गुरुपुंगवः॥सौभाग्यविद्याबगलावाराहीचततःपरं॥२८॥आपदो द्धारणंदेवीप्रदद्याद्कुलनायके॥श्रीतिरस्करिणीदद्यात्पश्चान्नवत्रयंप्रियं॥श्रीविद्यामंत्रखंडेनबालमंत्रत्रयेणच॥ श्रीशिवादिपृथिव्यंतेमादिक्षांतस्वरैर्युतं ३० गुरुत्रयादिपीठांतदेयंशिष्यायदेशिकः॥यास्यांकुंभंसमादायशिष्यं

श्री ९

कालेषुपुण्यवन्यपुवादरात्॥कुर्यात्सरक्षणांपूजांगुरोःप्रत्यहमेवच॥उक्तेषूत्पातजातेषुपूजयेत्स्वर्णपुष्प कः॥अभिषिक्तस्तुविधिनाप्रदद्याद्दक्षणांगुरोः॥गुरुंतदग्रतःप्राप्तविद्यांतदनुजंतथा॥गुरार्गुरुंतदुरुंचस्वा ग्रतोलब्धविद्यकान्॥चंदनंचंदनकाश्मीरलक्तकस्तूरिकायुतैः॥पंकंविधायसर्वत्रगुरुमंडलकल्पनं॥पूजांते मार्जयित्वातज्जलंचोरसिचांसयोः॥धारयेत्सर्वतोलक्ष्मीरस्यस्यात्परमेश्वरी॥पूर्वोक्तमंडलेवयानिस्था नानिपूजयेत्॥प्रोक्तानितानिसर्वाणिपद्मानिपरिकल्पयेत्॥ ॥इतितंत्रसारोक्तपूर्णाभिषेकविधिः॥ ॥ अथपूर्णाभिषेककारणेदोषमाह॥मंत्राचारेकनिरतागुरुभक्तादृढव्रताः॥पूर्णाभिषेकपूतायेतेभुक्त्वाश्वा श्नुवंतिते॥पूर्णाभिषेकहीनायेकदाचिन्निधनंगताः॥पुनर्लब्धोत्तमंजन्मगुरुणाशिवरूपिणा॥श्रुत्वापूर्ण भिषेकेणशिवसायुज्यगामिनः॥तेतुभक्त्याभवंत्येवंशंभवीवाक्यमब्रवीत्॥पूर्णाभिषेकहीनोयोमंत्रदा नंकरोतिच॥पिशाचत्वमवाप्नोतियावदाभूतसंप्लवं॥पूर्णाभिषेककर्तायोगुरुस्तस्यैवपादुकां॥विभाव यद्धृत्यरंध्रसर्वदासाधकोत्तमः॥अन्यथाकुरुतेयस्तुशिवशापोभवेद्ध्रुवं॥ ॥इतिपूर्णाभिषेकविधिः समाप्तः॥ ॥सारसंग्रहे॥पूर्णाभिषेकंवक्ष्यामिसाधकानांशुभावहं॥विनायेनाभिषेकेनसाधकःपूर्ण बोधतां॥आचार्यत्वंचनाप्नोतिसद्गतिंचसमीहितां॥तस्माद्गुरुःप्रियंशिष्यंबोधयित्वाभिषेचयेत्॥विरज्यवि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

लंचकंमंडुपेतिमनोहरं॥खारितोयभ्यतंकुंभंस्थापयेच्चक्रमध्यतः॥अन्येषुकलशान्वस्त्रहेमविभूषितान्
॥दलेषुविधिवत्स्थाप्यतत्रावाह्येष्टदेवतां॥अभ्यर्चमध्येचान्येषुचांगावरणदेवताः॥शिष्यस्यजन्मनक्षत्रेश
ग्वेतैरभिषेचयेत्॥अयंपूर्णाभिषेकस्यसाधकाभीष्टसिद्धिदः॥ ॥खारीलक्षणंतुस्कांदे॥तुभ्यंहयंप्रसृतं
चकुंडंद्विगुणसंमतं॥चतुर्भिःकुडवैःप्रस्थंआढकस्तेश्चतुर्गुणैः॥चतुर्गुणोभवेद्द्रोणःकुंभस्तद्द्वयतःस्मृतः
॥कुंभैस्तैरष्टभिःखारिलक्षणंसमुदाहृतं॥ ॥पूर्णाभिषेककलशजलेनजगदंबिके॥यस्यकस्यापिदेवेशी
यत्रकुत्रापिभामिनी॥नीतिनापिभवेत्स्नानंयदिदेवेशिवेनतु॥ब्रह्मांडोदरतीर्थेर्दैःस्नातमेवनसंशयः॥ब्र
ह्महत्यादिपापानिनश्यंत्येववरानने॥ ॥इतिपूर्णदीक्षापद्धतिः॥ ॥श्रीशके १७३ विरोधकृद्वे॥फा
ल्गुनशुद्ध १ गुरावित्पुस्तकंसमाप्तं॥ ॥महादेवोजयति॥ ॥श्रीत्रिपुरेभ्यार्पणमस्तु॥ ॥श्री॥ ।

श्री
२